National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 305-307
© 2025 NJHSR
www.sanskritarticle.com

**प्रो. के. अनन्ता**
आचार्यः,विशिष्टाद्वैतवेदान्तविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, नवदेहली- 16

**Correspondence:**
**प्रो. के. अनन्ता**
आचार्यः,विशिष्टाद्वैतवेदान्तविभागे,
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, नवदेहली- 16

# विशिष्टाद्वैतमतरीत्या जीवेश्वरयोः परिचयः

**प्रो. के. अनन्ता**

द्वयोर्भावः द्विता, द्विता एव द्वैतम् , न द्वैतम् अद्वैतम्, विशिष्टं विशिष्टश्च विशिष्टे, विशिष्टश्च तद् अद्वैतश्च इति विशिष्टाद्वैतम्। वैशिष्ट्यश्च च चिदः अचिदः च शरीरशरीरिभावसम्बन्धेन । नव सम्बन्धाः सन्ति, यथा शरीरशरीरिभावसम्बन्धः, शेषशेषिभावसम्बन्धः, दासस्वामिभावसम्बन्धः, राजाभृत्यसम्बन्धः, पितृ-पुत्रादिसम्बन्धश्च इत्यादयः। एतेषु शेषशेषिभावः सम्बन्धः मुख्यो भवति । अयमेव विषयः तत्र भवान् श्रीभाष्यकारः स्वकीये वेदान्थसङ्ग्रहे प्रथममङ्गलश्लोके[1] प्रतिपादयत् । प्रलयकाले ब्रह्मणः सत् इति संज्ञा । तदानीं सत् परमात्मा नाम-रूपविभाग -अनर्ह- चिदचिद्विशिष्टः आसीत् । सृष्टि-अवस्थायाञ्च इदानीं नामरूपविभाग-अर्हचिदचिद्विशिष्टः वर्तते। तयोः परमात्मनोः अद्वैतम् इह उच्यते। विशिष्टाद्वैतशब्दस्यार्थः श्रीमन्नारायण एव। विशिष्टद्वैतवेदान्ते यत्र यत्र ब्रह्मशब्दः प्रयुज्यते तत्र तत्र साक्षात् श्रीमन्नारायणो भगवान् अभिधीयते ।

**सदेव सौम्य इदम् अग्रे आसीद् एकमेव अद्वितीयम्।**[2] अत्र इदं दृष्यमाणं जगत् अर्थात् चेतनाचेतनात्मकं, अग्रेः सृष्टेः पूर्वम् सद् एव अर्थात् सद्रूपेण आसीत्। एकमेव तत्रापि एव इति अवधारणेन कालान्तरे सम्भाव्यमानायाः सृष्टेः उपादानकारत्वं स्फुटं भवति । अद्वितीयपदं निमित्तान्तरं व्यावर्तयति। तेन च सत् संज्ञकं ब्रह्म एव जगतः उपदानकारणं निमित्तकारणञ्च इति स्पष्टम्। अयमेव विषयः विशिष्टाद्वैतवेदान्ते अभिन्ननिमित्तोपादानप्रतिपादनविषये प्रतिपाद्यते। तत्त्वं नाम यथार्थं वस्तु भवति ।एकमेव तत्त्वम् – श्रीमन्नारायणः स च चिदचिद्विशिष्टः इत्यनेन तत्त्वत्रयम्, चिद् अचिद् ईश्वरश्च । अब्रह्मात्मकं न किञ्चित् इह लोके विद्यते इत्यर्थः एवमेव तत्त्वमित्यपि प्रतिपादयन्ति। अत एव उच्यते श्रीमन्नारायण एव चिदचिद्विशिष्टम् अद्वैतं तत्त्वमिति । तत्र प्रकारप्रकारिणोः मिथो अत्यन्तभेदेऽपि विशिष्ट-ऐक्यविवक्षया एकत्वव्यपदेशः।

## चित्स्वरूपम्

चिनोति स्वातन्त्र्येन इति चित्। चित् एव जीवः। चैतन्ययुक्तत्वात् चिद् इति कथ्यते। चैतन्यञ्च धर्मभूतज्ञानम् । धर्मिभूतज्ञानं जीवः। ईश्वरोऽपि धर्मिभूतज्ञानम् एव । जीवः नित्यः जीवः उत्पन्नः जीवः मृतः इति प्रतीतिस्तु जीवस्य देहसम्बन्धे जाते उत्पत्तिरिति प्रयोगः । देहवियोगे जाते मृतः इत्युच्यते लोके किन्तु जीव नोत्पद्यते न नश्यति च ।

1. **ज्ञाज्ञौ द्वौ अजौ ईशनीशौ**[3]
2. **नित्यो नित्यानाम् चेतनः चेतनानाम् एको बहूनां यो विदधाति कामान्**[4]
3. **अजो नित्यः शाश्वतोऽयं पुराणः न हन्यते हन्यमाने शरीरे**[5]
4. **नात्मा श्रुतेः नित्यत्वाच्च ताभ्यः**[6]

तस्य ज्ञानञ्च नित्यम् । यद्यपि जीवस्य ज्ञानम् उत्पद्यते नश्यते इव भवति तथापि तत् संकोचविकास एव। जीवः अणुस्वरूपः जीवस्य उत्क्रान्ति इत्यादि श्रवणात्, प्रमाणाच्च अणुत्वम् –

**1. एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणाः पञ्चधा संविवेश**[7]

**2. बालाग्रशतभागस्य शतधा कल्पितस्य च ।**
**भागो जीवः स विज्ञेयः स च आनन्त्याय कल्पते ।।**[8]

**3. आराग्रमात्रो हि अवरोऽपि दृष्टः ।**[9]

**4. उत्क्रान्तिगति आगतीनाम्**[10]

**5. तेन प्रद्योतेन एष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वा अन्येभ्यो शरीरदेशेभ्यः**[11]

जीवः एकः इति व्यवहारस्तु व्रीहिराषौ एकोव्रीहिः इतिवत् एव भवति। न तु जीवानां स्वरूपैक्यम् । ज्ञान-एकाकरत्वात् जीवः इत्युच्यते। जीवः कर्ता भोक्ता शरीरी शरीरं च भवति । त्रिविधश्च-बद्ध-मुक्त-नित्यभेदात्। **बद्धस्य लक्षणम् – अनुवृत्तसंसाररत्वं** बद्धजीवस्य लक्षणम्। ते च जीवाः चतुर्दशभुवन-अण्डकटाहवर्तिनो भवन्ति। ब्रह्मादिस्थावरपर्यन्ताः सर्वेऽपि जीवाः बद्धाः एव। कर्मफलभोक्तृत्वात् । बद्धः द्विविधः- शास्त्रवश्यः (करणायत्तज्ञानाः शास्त्रवश्याः), शास्त्रावश्यश्च (करणायत्तज्ञानाभावात् शास्त्रावश्याः)। पुनश्च द्विविधः- बुभुक्षु मुमुक्षुश्च। अर्थकामपरो धर्मपरश्चेति द्विविध बुबुक्षुः। मोक्षपरः मुमुक्षुः । मुमुक्षुश्च द्विविधः कैवल्यपरः(प्रकृति-वियुक्त-केवलात्मस्वरूपवान्) मोक्षपरश्च। मोक्षपरः द्विविधः भक्तः प्रपन्नश्च। भक्तः साधनभक्तिनिष्ठो भवति। प्रपन्नश्च साध्यभक्तिनिष्ठो भवति। मुक्तस्य लक्षणम् – पूर्वम् अनुवृत्तसंसारत्वे सति आविर्भूतगुणाष्टकत्वादिः अनावृत्तिसंसारत्वं च मुक्तस्य स्वरूपम् । नित्यजीवस्य लक्षणम् – ज्ञानसङ्कोचप्रसङ्गरहितत्वं नित्यजीवस्य लक्षणम् । ते च नित्यजीवाः भगवतः विरुद्धं कदापि नाचरन्ति । **सदा पश्यन्ति सूरयः** इत्यादि प्रमाणात् । जीवः तस्य ज्ञानञ्च स्वप्रकाशमेव ।

**जीवेश्वरयोः साधारणलक्षणानि-** प्रत्यक्त्वम्, चेतनत्वम्, आत्मत्वं , कर्तृत्वम् इत्यादीनि । प्रत्यक्त्वं नाम स्वयं प्रकाशत्वम् । स्वयं प्रकाशत्वं नाम स्वस्मै स्वयमेव भासमानत्वम्। चेतनत्वं नाम् चैतन्याश्रयत्वम्, चैतन्यं नाम धर्मभूतज्ञानं ते आश्रितत्वात् चेतनत्वमिति। आत्मत्वं शरीरप्रतिसम्बन्धित्वम् । कर्तृत्वं नाम सङ्कल्पज्ञानाश्रयत्वम्।

**जीवस्य असाधारणलक्षणानि –** अणुत्वे सति चेतनत्वम् , स्वतःशेषत्वे सति चेतनत्वम्। आधेयत्वे सति चेतनत्वम्, विधेयत्वे सति चेतनत्वम्, पराधीनकर्तृत्वम्, परतन्त्रत्वे सति चेतनत्वमित्यादीनि । अणुत्वे सति चेतनत्वमिति लक्षणे चेतनत्वमित्येव लक्षणस्य उक्ते सति ईश्वरे अतिव्याप्तिः। अतः अणुत्वे सतीति। ईश्वरस्य विभुत्वात् अणुत्वनिवेशनेन नातिव्याप्तिः। अणुत्वमित्येव लक्षणे उक्ते पृथिव्यादिपरमाणुषु अतिव्याप्तिस्तत्रापि अणुत्वस्य सत्त्वात्। अतः चेतनत्वमिति निवेश्यते। पृथिव्यादिपरमाणूनां प्रकृतीनाम् अचेतनत्वात् न अतिव्याप्तिः सम्भवति। एवमेव स्वतः शेषत्वे सति चेतनत्वमित्यत्रापि । स्वतः शेषत्वमात्रोक्तौ अचेतने अतिव्याप्तिः तस्यापि परमात्मानं प्रति स्वतः शेषत्वात् तथा च चेतनत्वनिवेशनेन नातिव्याप्तिः । केवलचेतनत्वमिति कथने तु ईश्वरे अतिव्याप्तिः अतः स्वतःशेषत्वमिति निवेशनम्। ईश्वरस्य स्वतः शेषित्वात् स्वतःशेषत्वाभावाच्च नातिव्याप्तिः। (शेषत्वं नाम यथेष्टविनियोग-अर्हत्वम् शेषत्वम्। यथा चन्दकुरुमादि।) आधातुं योग्यं आधेयं भवति। एवमेव आधेयत्वे सति चेतनत्वम् इत्यादि स्थलेषु ।

**जीवः देहेन्द्रमनःप्राणधीभ्यः भिन्नः**

**देहेन्द्रियमनःप्राणधीभ्यः अन्यः अनन्यसाधनः ।**

**नित्यो व्यापी प्रतिक्षेत्रम् आत्मा भिन्नः स्वतः सुखी ।।**[12]

जीवः देहभिन्नः- मम शरीरमिति प्रतीत्या – ज्ञानेन देहात् भिन्नः जीवः। मम इत्यनेन शरीरप्रतिसम्बन्धित्वमेव ज्ञायते । इन्द्रियभिन्नः-चक्षुषा पश्यामि, श्रोत्रेण श्रृणोमि , वाचा वदामि, पद्भ्यां गच्छामि इत्यादि प्रतीत्या इन्द्रियाणां करणत्वेव ज्ञायते न तु जीवात्मत्वम्। मनोभिन्नः- मनसा स्मरामि जानामि वा इति प्रतीत्या मनसो भिन्नः। मनसः करणत्वमेव बुद्ध्यते। प्राणभिन्नः- मम प्राणाः इति प्रतीत्यैव प्राणभिन्नः। धीभिन्नः- अहं जानामि इति प्रतीत्या ज्ञानाश्रयत्वमेव ज्ञायते न तु धर्मभूतज्ञानस्वरूपत्वम् । अहं स्थूलः, अहं कृशः, अहं पश्यामि, अहं श्रृणोमि इत्यादि प्रतीतयः तु भ्रान्तिमूलम् एव ।

**ईश्वरनिरूपणम्**

**जीवेश्वरयोः साधारणलक्षणानि-** प्रत्यक्त्वम्, चेतनत्वम्, आत्मत्वं, कर्तृत्वम् इत्यादीनि । प्रत्यक्त्वं नाम स्वयं प्रकाशत्वम् । स्वयं प्रकाशत्वं नाम स्वस्मै स्वयमेव भासमानत्वम्। चेतनत्वं नाम चैतन्याश्रयत्वम्, चैतन्यं नाम धर्मभूतज्ञानं ते आश्रितत्वात् चेतनत्वमिति। आत्मत्वं शरीरप्रतिसम्बन्धित्वम् । कर्तृत्वं नाम सङ्कल्पज्ञानाश्रयत्वम् ।

**ईश्वरस्य असाधारणलक्षणानि-**

1. सर्वेश्वरत्वम् (ईशावास्यमिदं सर्वम् इत्यत्र प्रसिद्धम्)
2. सर्वशेषित्वम् (ईश्वरः सर्वभूतानां हृद्देशे अर्जुन तिष्ठति। भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया इति गीतायां प्रसिद्धम्)
3. सर्वकर्मसमाराध्यत्वम्
4. सर्वकर्मफलप्रदत्वम्
5. सर्वाधारत्वम्
6. सर्वकार्योत्पादकत्वम्
7. सर्वशब्दवाच्यत्वम् (सर्वे वेदाः यत्पदम् आमनन्ति, सर्वे वेदाः यत्र एकीभवन्ति - श्रुतिः)
8. स्वज्ञान-स्वेतरसमस्तद्रव्यशरीरित्वम् ।
9. मोक्षप्रदत्त्वम्

**सर्वेश्वरत्वत्वं** - नाम सर्वस्य ईश्वरत्वम् । सर्वमित्यनेन चिदचिदोः ग्रहणम्। ईश्वरत्वं नाम नियन्तृत्वम्। तथा च नियाम्यत्वं चिदचिदोः नियन्तृत्वञ्च ईश्वरस्य भवति । (मया अध्यक्षेण प्रकृतिः सूयते स चराचरम् – गीतायां प्रसिद्धम्)

**सर्वशेषित्वम् -** सर्वेषां चिदचिदानां शेषित्वम् अर्थात् स्वामित्व-मित्यर्थः। शेषत्वं नाम यथेष्टविनियोग-अर्हत्वम्। यथेष्टविनयोगार्ह-पदार्थवान् शेषी भवति। तथा सर्वस्यापि शेषित्वं परमात्मनि एव वर्तते इति समन्वयः।

**सर्वकर्मसमाराध्यत्वम्-** सर्वकर्मणां समाराध्यत्वत्वम् । आराधनं नाम प्रीणनम्। आराधनस्य पात्रम् आराध्यं भवति । तथा च सर्वेषाम् अपि कर्मणां वेदोक्तानां समाराध्यत्वम् ईश्वरे श्रीमन्नारायणे अस्तीति समन्वयः। येऽन्यदेवताः भक्ताः यजन्ति विधिपूर्वकम् । ते अपि मामेव कौन्तेय यजन्ति अविधिपूर्वकम् इति गीताश्लोके प्रसिद्धम्)

**सर्वकर्मफलप्रदत्वम् –** सर्वकर्मफलप्रदाता ईश्वरो भवति । फलमत उपपत्तेः- (ब्रह्मसूत्रम्- तृतीयाध्याये) इति सूत्रे ईश्वरस्यैव सर्वकर्मफलप्रदत्तवम् उक्तं विद्यते ।

**सर्वाधारत्वम् –** सर्वेषां चिदचिदानाम् आधारत्वं भवति । (सन्मूलाः सौम्य इमाः प्रजाः सदायतनाः सत्प्रतिष्ठाः- छान्दोग्योपनिषदि प्राप्यते)

**सर्वशब्दवाच्यत्वम् –** सर्वेषां शब्दानां वाचकः ईश्वरो भवति ।(सर्वे वेदाः यत्पदम् आमनन्ति, सर्वे वेदाः यत्र एकीभवन्ति - श्रुतिः)

**ईश्वरस्य जगत्कर्तृत्वम्**

- सूक्ष्मचिद् अचिद् विशिष्टवेशेण जगतः उपादानकारणं भवति। (सदेव सौम्य इदमग्र आसीत् एकमेव अद्वितीयम्)। कार्यरूपेण विकारयोग्यं वस्तु उपादानकारणं भवति ।
- सङ्कल्पविशिष्टवेशेण निमित्तकारणं भवति।( तत्तेजो असृजत, आत्मनः आकाशः सम्भूत इत्यादि)। कार्यतया परिणामयितृ निमित्तकारणम् ।
- कालादि-अन्तर्यामिवेशेण सहकारिकारणं भवति। कार्योत्पत्ति-उपकरणं वस्तु सहकारिकारणं भवति ।

• **सदेव सौम्य इदम् अग्रे आसीद् एकमेव अद्वितीयम्।** अत्र इदं दृष्यमाणं जगत् अर्थात् चेतनाचेतनात्मकं, अग्रेः सृष्टेः पूर्वम् सद् एव अर्थात् सद्रूपेण आसीत्। एकमेव तत्रापि एव इति अवधारणेन कालान्तरे सम्भाव्यमानायाः सृष्टेः उपादानकारत्वं स्फुटं भवति। अद्वितीयपदं निमित्तान्तरं व्यावर्तयति । तेन च सत् संज्ञकं ब्रह्म एव जगतः उपदानकारणं निमित्तकारणञ्च इति स्पष्टम् ।

ईश्वरश्च श्रीमन्नारायण एव। जगत्कारणवाचशब्दानां ब्रह्म-सत्-आत्मा-ईश्वर इत्यादीनां श्रीमन्नारायणे एव पर्यवसानं विद्यते। (अन्तर्बहिश्च तत् सर्वं व्याप्यनारायणस्थितः इत्यादिस्थलेषु पुरुष-सूक्तादिषु नारायणस्यैव कारणत्वम् उच्यते )

अद्वैते निर्गुणं निष्क्रियं इत्यादि वेदान्तवाक्यैः निर्गुणं ब्रह्मेति कथ्यते। तेन सगुणवाक्यानां परित्यागो भवति । अस्माकं विशिष्टाद्वैतसिद्धान्ते निर्गुणशब्देन ब्रह्मणः हेयगुणरहितत्वम् उच्यते न तु गुणशून्यत्वम्। तथा च सगुणमेव ब्रह्म।

**ईश्वरस्य जगत्कारणत्वप्रतिपादकाः श्रुतयः-**

**सत्यं ज्ञानम् अनन्तं ब्रह्म (तै उ)- स्वरूपलक्षणम्**

अद्वैते सत्यपदेन असत्यात्व्यावृत्तस्वरूपं गृह्यते। ज्ञानमित्यनेन अज्ञानात् व्यावृत्तं स्वरूपं गृह्यते। अनन्तपदेन देशकालवस्तुभ्यः व्यावृत्तं स्वरूपं गृह्यते । तथा च सत्यं ज्ञानम् अनन्तं च ब्रह्म भवति।

विशिष्टाद्वैते तु सत्यपदेन सत्यत्वविशिष्टं ब्रह्मोच्यते। ज्ञानपदेन ज्ञानत्वविशिष्टं ब्रह्मोच्यते । अनन्तपदेन अनन्तत्वविशिष्टं ब्रह्मोच्यते। तेन सगुणमेव ब्रह्म भवति ।

**यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्ति अभिसंविशन्ति तद्विजिज्ञासस्व** इत्यनेन जगत्कारणत्वम् ईश्वरस्य ज्ञायते ।

ईश्वरः विभुः। विभुत्वं नाम व्यापकत्वम् । ईश्वरः स्वरूपेण विग्रहेण धर्भूतज्ञानेन च सर्वव्यापी भवति । ईश्वरः अनन्तो भवति । अर्थात् देश-काल-वस्तुपरिच्छेदरहितो भवति ।

ईश्वरः पञ्चधा अवस्थितः-

1. **परः (वैकुण्ठे श्रिया सहासीनो वासुदेव एव परः)**
2. **व्यूहः (वासुदेव-सङ्कर्षण-प्रद्युम्न-अनिरुद्धाःव्यूहः, जीवानां उपासनार्थं जगत्सृष्ट्यर्थञ्च व्यूहाः भवन्ति )**
3. **विभवः (तत्तत्सजातीयरूपेण आविर्भावः विभवो भवति । यथा राम- कृष्ण- बलरामादयः अवताराः, यत्र ईश्वरस्य नारायणस्य वैभवं स्फुटम् ईक्ष्यते )**
4. **अन्तर्यामी (जीवान्तर्यामित्वमेव अन्तर्यामी उच्यते। सर्वासु अवस्थासु परमात्मा अन्तर्यामिरूपेण जीवस्य हृदयप्रदेशे अवस्थितो भवति)**
5. **अर्चावतारः (सकलमनुज-नयनविषयतां गतो मूर्तिविशेषः, यथा श्रीरङ्ग-तिरुमलादि दिव्यक्षेत्रगतो भगवतः मूर्तिविशेषाः)**

विद्यार्थिनां विशिष्टाद्वैतविषये जीवेश्वरविषययोः तत्र प्रतिपादितयोः सुलभतयावगत्यर्थं यथामत्यत्र प्रयासो विहितः मया ।

**सहायकग्रन्थाः-**


- अधिकरणसारावलिः, वेदान्तदेशिकः, वीपीटीवी कैङ्कर्य ट्रस्ट्, काञ्चीपुरम् 2016
- केनाद्युपनिषत्पुरुषसूक्तश्रीसूक्तभाष्यम्, श्रीरङ्गरामानुजमुनिविरचितम्, श्री उत्तमूर् वीरराघवाचार्य सेन्टिनरि ट्रस्ट्, चेन्नई- 2003
- यतीन्द्रमतदीपिका, श्रीनिवासाचार्यः, श्रीरङ्गं श्रीमदान्डवन् आश्रमम्, चेन्नई, 2002
- श्रीभाष्यम् श्रुतप्रकाशिकासहितम्, विशिष्टाद्वैतप्रचारिणी सभा, मद्रास, 1989
- तत्त्वमुक्ताकलापः, वेदान्तदेशिकः, आर्षग्रन्थप्रकाशनम्, मैसूर्, 2004


**पाद टिप्पणी**

[1]अशेषचिदचिद्वस्तुशेषिणे शेषशायिने।
प्रथमः पादः वेदार्थसङ्ग्रहमङ्गलाचरणे ।

[2]छान्दोग्योपनिषत्, 6-2-1

[3]श्वेताश्वतरोपनिषत्

[4]श्वेताश्वतरोपनिषत्

[5]कठोपनिषत्

[6]ब्रह्मसूत्रम् 2-3-18

[7]मुण्डकोपनिषत्

[8](श्वेताश्वतरोपनिषत्)

[9](श्वेताश्वतरोपनिषत्)

[10] (ब्रह्मसूत्रम् 2-3-20)-

[11] (बृहदारण्यकोपनिषत्)),

[12] आत्मसिद्धिः, जीवप्रकरणम्